International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2025; 11(2): 37-41
© 2025 IJSR
www.anantaajournal.com
Received: 16-01-2025
Accepted: 21-02-2025

**डा. स्नेहलता**
अतिथिप्राध्यापिका, शिक्षा शास्त्र विभागः, के.सं.वि. श्री रणवीरपरिसरः, जम्मू, जम्मू और कश्मीर, भारत

Corresponding Author:
**डा. स्नेहलता**
अतिथिप्राध्यापिका, शिक्षा शास्त्र विभागः, के.सं.वि. श्री रणवीरपरिसरः, जम्मू, जम्मू और कश्मीर, भारत

# उपनिषत्सु गुरूशिष्ययोः स्वरूपम्

**डा. स्नेहलता**

**DOI:** https://www.doi.org/10.22271/23947519.2025.v11.i2a.2586

**सारांशः**
उपनिषदः सर्वेषां भारतीयदर्शनानां मूलभूतः स्रोतः अस्ति यदि वयं समस्तविद्यानां विषये प्रवेशं कर्तुम् इच्छामः तर्हि उपनिषत्सु प्रतिपादितपद्धतीनामनुसरणं कर्त्तव्यमेव। मनुष्यः सर्वदा दुःखैः पीडितः भवति, अतः सः नित्यसुखं अन्वेषयति एव, एषा परा शान्तिः उपनिषदि ज्ञाने निहितः अस्ति। वेदाः आत्मानं कर्म-पूजन-ज्ञान-मार्गे अग्रे नीत्वा वदन्ति यत् यत्र-यत्र पुरुषः अस्ति तत्र-तत्र स्वकर्तव्यं कुशलतया निर्वहन् स्वाभाविकतया अग्रे गन्तव्यः इति उपनिषदामुपदेशः। उपनिषदादिषु जटिलविषयम् अवश्यं अवगतवन्तव्यः, तेषु गुरुशिष्यवद् व्यवहारः, संवादपरम्परा, उपदेशपरम्परया च अनुसर्तव्यः। आचार्यशिष्ययोः मध्ये परस्परं सौहार्दपूर्णः सम्बन्धः शिक्षाप्राप्त्यर्थं "सेतुः" भवति। येन माध्यमेन व्यक्तेः समग्रं बौद्धिकं आध्यात्मिकं च विकासः, मानसिकविकासश्च तस्य नैतिकमूल्यानि आदर्शानि च निर्वाहयितुं समर्थं करोति।

**कूट शब्दः** शिक्षा, गुरू, शिष्य, परम्परा, पुरुषार्थः, प्रश्नः

## प्रस्तावना

**उपनिषदः** भारतीयाध्यात्मिकचिन्तनस्य आधाराः सन्ति, या 'ब्रह्मविद्या' अपि कथ्यते। वैदिकसाहित्ये 'उपनिषद्' संहिता-ब्राह्मण-आरण्यकग्रन्थस्य पश्चात् आगच्छति। वेदस्य सारम् उपनिषदः। मनुष्यः एकः जिज्ञासुः प्राणी अस्ति, यस्य मनसि असंख्यप्रश्नाः नित्यं समुत्पद्यन्ते - सृष्टिः कथं अभवत्? केन अभवत्? आत्मा इति किम्? ईश्वरः अस्ति वा न? यदि परमात्मा अस्ति तर्हि केन कदा कथं च निर्मितम्। पुनर्जन्मः अस्ति वा न? मृत्योरनन्तरं किं भवति? यदि आत्मा अस्ति तर्हि मृत्योः परं का स्थितिः इत्यादयः। उपनिषत्सु पूर्वोक्तकौतुकानाम् उत्तराणि ऋषिभिः अनुभवप्राप्तज्ञानेन अबोधकान् शिष्य-प्रशिष्येभ्यः दीयते। उपनिषदः गम्भीरचिन्तनस्य परिणामाः सन्ति। उपनिषदः प्रत्येकस्य दर्शनस्य उत्पत्तिस्थानम्, वेदान्तस्य तु समग्रं सारं उपनिषदम् एव। व्यक्तेः अविद्यायाः (अज्ञानस्य) नाशः, परमात्मनः (ब्रह्म) प्राप्तिः, दुःखं च नाशयति सा विद्या (ज्ञानम्) उपनिषद् इति सिद्धम्। जीवन-मरणचक्रात् विमुक्तं यत् ज्ञानं लभते। उपनिषत् अविद्यां नाशयति, सत्यं ज्ञानं ददाति। सच्चिदानन्दस्य तात्पर्यमेतत् यत् ज्ञानं जन्म-मरणबन्धनात् मोचयति। यतोहि भारतीयसंस्कृतेः चतुर्णां पुरुषार्थानां (धर्म, अर्थ, काम, मोक्ष) 'मोक्ष' इत्यनेन सह सम्बन्धः 'उपनिषद्' अस्ति। अतः यस्मिन्

मनुष्यः 'मोक्ष' लब्धुं शक्नुयात् तत् तत्त्वज्ञानमेव उपनिषदानां प्रयोजनम्। येन ब्रह्मणः सान्निध्यं निश्चयेन लभ्यते स उपनिषत्। केनोपनिषदि परमात्मनः अवगमनं अतीव महत्त्वपूर्णं कार्यम् अस्ति। अतः तस्य परमतत्त्वस्य व्याख्यानार्थं गुरु-शिष्यसंवादरूपेण गहनरहस्यचर्चा कृता अस्ति। चतुर्धाविभक्तस्य केनोपनिषदः प्रथमे भागे यदा शिष्यः जिज्ञासया प्रश्नेन इन्द्रियाणां प्रेरकतत्त्वं जानाति? गुरुः शिष्यं प्रवदति यत् सर्वप्रेरकतत्त्वं परब्रह्म एव। द्वितीयभागे आत्मा ईश्वरस्य अंशत्वेन वर्णितः अस्ति तथा अस्मिन् एव जन्मनि ब्रह्मतत्त्वस्य ज्ञानस्य आवश्यकता प्रस्ताविता अस्ति। तृतीय-चतुर्थखण्डेषु परमेश्वरः सर्वप्रेरकः परमेश्वरपूजायाः प्रकाराः परिणामाश्च अतीव उदात्तगम्भीरशैल्या वर्णिताः सन्ति।

कठोपनिषदि नचिकेतायमयोः संवादस्य प्रसिद्धः आख्यानः अस्ति। अस्मिन् विश्वजित् यज्ञस्य अन्ते वाजश्रवः सर्वस्वं दानं करोति। यस्मिन् तं वृद्धाः दुर्बलगाः दानं कुर्वन्तं दृष्ट्वा बालकनचिकेतसः मनसि प्रश्नः उत्पद्यते यत् एतेषां असहायगवानां दानस्य किम् औचित्यम्? यतः एताः गावः गृहीत्वा दाता किं लाभं प्राप्स्यति? एताः गावः क्षीरदानाय असमर्थाः, चाराः अपि न सुलभतया ग्रहणेऽसमर्थाः, अतः एतादृशानां गवां प्राप्तेः कथं कस्यचित् लाभः भविष्यति। एतादृशे परिस्थितौ सः स्वपितरं पृच्छति यत् त्वं मां कस्मै दानं करिष्यसि यतोहि अस्मिन् दाने सर्वं दानं कर्तुं परम्परा अस्ति, पिता नोत्तरति, आभीक्ष्ण्ये एकमेव प्रश्नं पृष्टः सन् पिता क्रोधेन कथयति यत्, "अहं भवन्तं मृत्यवे ददामि" इति। एकः ब्राह्मणबालकः अन्नं जलं विना त्रिदिनानि यावत् प्रतीक्षमाणः आसीत्, फलतः यमप्रदत्तेषु त्रिषु वरेषु प्रथमवरेण नचिकेता पितुः सुखं याचते। द्वितीये वरे बालकः आत्मज्ञानस्य रहस्यं ज्ञातुम् इच्छति, किन्तु द्वितीयं वरं तस्मै गूढपुरुषेण दत्तं, यत् महाविदुषां मनसि निगूढम् अस्ति, बालः कथम् अवगमिष्यति। यमः तं परीक्षते ततः तस्मै बोधयित्वा कथयति यत् प्रबुद्धस्य इन्द्रियाणां नियन्त्रणम् अतीवमहत्त्वपूर्णम् इति। न कश्चित् ब्रह्मातिक्रमितुं शक्नोति। सूर्य-चन्द्र-नक्षत्राणि यस्मात् ज्योतिः प्राप्नुवन्ति स ब्रह्माऽमृतमित्युच्यते। तस्मिन् प्रवाहे कोऽपि अतिक्रमणं कर्तुं न शक्नोति।

प्रश्नोपनिषदि सुकेशादि षण्णामृषीणां जिज्ञासामुपशयितुं समाधातुं वा पिप्पालादेन ऋषिणा ब्रह्मणः ब्रह्मांशेन वा प्रवर्तते। अस्मिन् षड् ऋषयः शिष्यवत् तथा गुरुवत् पिप्पलादः तेषां योग्यतायाः परीक्षाणानन्तरं ब्रह्मविद्यामुपदिशति।

मुण्डकोपनिषदि त्रीणि मुण्डकाः सन्ति, प्रत्येकं मुण्डकस्य द्वौ विभागौ भवतः। शौनकादिः विधिपूर्वकम् अङ्गिरां मुनिमपृच्छन्- "प्रभो! किं तत् वस्तु एकं ज्ञात्वा सर्वं ज्ञातुं शक्यते? महर्षि अङ्गिरः परा-अपरा इति विद्याद्वयं प्रतिपादितवान्, यस्मिन् 'अपरा विद्या' या लौकिक-आध्यात्म-वस्तूनाम् (भौतिकद्रव्याणां) ज्ञानं बोधयति, 'परविद्या' च अखण्ड-अक्षर-परम-तत्त्वज्ञानं बोधयति इति 'परा' इति। मुण्डकोपनिषदि द्वौ पक्षिणौ परस्परं मित्रौ स्तः, उभौ आत्मानौ वृक्षरूपेण शरणं गृहीतः।

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्यो अभिचाकशीति ॥[1]"

मानुषशरीरस्य वृक्षसदृशत्वम् उपर्युक्तमन्त्रस्य सारः इत्यर्थः। अस्मिन् देहरूपे वृक्षे ईश्वरः प्राणिनः च (द्वौ मित्रपक्षिणौ) शरीररूपस्य वृक्षस्य हृदये (नीडे) मिलित्वा निवसन्ति। जीवः कर्मफलस्य भोक्ता भवति यदा तु ईश्वरः कर्मफलेन सह न सम्बद्धः, अपितु केवलं तान् अवलोकयति। तथा श्रीमद्भगवद्गीतायां अपि जगतः अश्वत्था (पीपल) वृक्षः इति वर्णितः अस्ति प्रस्तुते मन्त्रे शरीरं पीपलवृक्षत्वेन वर्णितं, आत्मा परमात्मा च पक्षिद्वयम् इति वर्णितम्। अयमपि गुरुशिष्यपरम्परायां निरूपयति।

बृहदारण्यकोपनिषदि वर्णित याज्ञवल्क्यः तस्मिन् काले अतीव बुद्धिमान् विद्वान् च आसीत् । तस्य आध्यात्मिकदार्शनिकशिक्षासम्बद्धे अस्मिन् उपनिषे संवादमाध्यमेन कठिनविषयं सुलभं कर्तुं प्रयत्नः कृतः अस्ति। येषु आत्मनः स्वरूपनिरूपणे गार्ग्य-अजातशत्रोः संवादः, तत्त्वज्ञानविषये याज्ञवल्क्य-जनकसंवादः, ब्रह्मणः सर्वव्यापकताविषये याज्ञवल्क्य-मैत्रेयीसंवादादयः। याज्ञवल्क्यस्य पत्नीद्वयी आस्ताम्। तयोर्मध्ये ब्रह्मज्ञानसम्बन्धितसंवादः अतीवमहत्त्वपूर्णः अस्ति। मैत्रेयी "ब्रह्मविद्यायां निपुणा" इति वर्णिता। यदा याज्ञवल्क्यः गृहस्थजीवनं परित्यज्य संन्यासं ग्रहीतुं इच्छति, तदा सः स्वधनं कात्यायन्यै च मैत्रेय्यै च विभजति। किन्तु मैत्रेयी धनस्य अपेक्षां परित्यज्य ब्रह्मविद्यायाः शिक्षां प्राप्तुं निश्चिनोति। ज्ञानसम्बन्धितसंवादे गुरुशिष्यवद् व्यवहारः दृश्यते। अर्थात् जनानां मध्ये कथञ्चिदपि व्यवहारः स्यात् परन्तु ज्ञानविषयं समुपस्थिते सति गुरु-शिष्येव प्रतिपाद्य-प्रतिपादकस्य लक्ष्यं शिष्यस्य आत्मज्ञानमेव भवति।

मनुष्यः यैः सह व्यवहरति तेषां संस्काराणां, विचाराणां वा प्रभावः तस्य मनसः बुद्धेश्चोपरि परिवर्तनमानयति। यद्यपि मनुष्ये जन्मतः गुणाः अवश्यं प्रवर्तन्त। सतां सङ्गेन दुष्टोऽपि सज्जनः जायते। यथोक्तं-"सज्जनसङ्गेन दुर्जनः सज्जनायते[2]" इति। गुणाः विचाराश्च व्यक्तिं महान्तं कारयन्ति। अतः सुगुणसम्पन्नाभिः व्यक्तिभिः सह

[1] मुण्डकोपनिषद् ३.१.१

[2] सुभाषित

मैत्रीकरणेन तेषु विद्यमानाः गुणाः स्वस्मिन्नपि आरोपिताः भवन्ति वृद्धिश्चाप्नुवन्ति, समाजे सम्मानमपि एधते। "महाजनस्य संसर्गः कस्य नोन्नतिकारकः[3]"। विदुषां संसर्गः वा सङ्गः अत्यन्तं कष्टेन पुण्येनैव च प्राप्यते। सतां सङ्गः सुदुर्लभः मन्यते। अतः प्राप्तसङ्ग दीर्घकालिकं यावत् मम्पुनीयात्। तेन जीवनमपि सार्थकं कर्तुं प्रभवेम।

प्राचीनभारतीयशिक्षायाः प्रारम्भः ऋग्वेदकालात् मन्यते। भारतीयसमाजे शिक्षा वा विद्यायाः स्वरूपम् अतीव सुसंगठितं, सुनियोजितञ्च आसीत्, यस्मिन् लौकिक-आध्यात्मिकजीवनाय विविधप्रकाराः शिक्षाः प्रदीयते स्म। शिक्षा न केवलं मनुष्यं बुद्धिमान्, परिष्कृतमुन्नतञ्च करोति, अपितु मानवं समाजञ्च नैतिकोच्चादर्शैः शासयति। उपनिषद्शिक्षाव्यवस्थायाः उद्देश्यं छात्राणां शारीरिक-मानसिक-आध्यात्मिक-शक्तीनां विकासः सम्पादयति। ऋग्वेदस्य 'सरस्वती-सूक्तेन' समकालीनशिक्षायाः प्रचलनं महत्त्वं च प्रकाशयति-

"पावका नः सरस्वती वाजेभिः वाजिनीवती यज्ञम् वष्टु धियावसुः।
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् यज्ञम् दधे सरस्वती।
महो अर्णः सरस्वती प्र चेतयति केतुना धियो विश्वा वि राजति।[4]"

अर्थात् विद्या अस्मान् परिशोधयति, इयं विद्यादेवी सत्याधारितकर्मप्रवर्तिनी सुमतिसृजती च। शिक्षायाः उद्देश्यविषये अल्टेकरस्य मतमस्ति यत् - "वैदिकयुगे शिक्षायाः मुख्याः उद्देश्याः आदर्शाः, भक्ति-धर्मणः, चरित्रनिर्माणं, व्यक्तित्वविकासः, नागरिक-सामाजिक-कर्तव्य-निर्वाहः, उन्नतिः" राष्ट्रीययसंस्कृतेः संरक्षणं प्रसारणं च उद्देश्यम् आसीत्। वैदिकशिक्षायाः स्वरूपं तादृशः आसीत् येन मनुष्यस्य सर्वतोमुखी विकासः भवितुम् अर्हति तथा च धर्ममार्गम् अनुसृत्य मनुष्यजीवनस्य परमं लक्ष्यं मोक्षं प्राप्तुं शक्नोति।

तदानीन्तने गुरुशिष्ययोः मध्ये अतीव सौहार्दपूर्णाः सम्बन्धाः आसन्, येन तत्कालशिक्षायाः व्यवस्था अन्यतमा मन्यते। गुरुः शिष्यं स्वपुत्रवत् मन्यते स्म, तस्य सम्पूर्णं बौद्धिकम् आध्यात्मिकं च विकासः करणीयमिति स्वकर्तव्यं मन्यते स्म। ते शिष्याय आवश्यकं सर्वं प्रयच्छन्ति स्म, गुरुमाता अपि अस्मिन् कार्ये स्वस्य पूर्णं सहायं ददति स्म। गुरोः व्यवहारः शिष्यं प्रति पूर्वाग्रहहीनः आसीत्। गुरुः सम्पूर्णतया शिष्यं प्रति समर्पितः आसीत्। यथा गुरुः स्वशिष्यं प्रति कर्तव्यनिष्ठः समर्पितः च आसीत्, तथैव शिष्यस्य अपि स्वगुरुं प्रति केचन कर्तव्याः दृश्यन्ते। शिष्यस्य कृते गुरुः आदर्शः आसीत्, गुरोः आदेशस्य पालनं परमकर्तव्यं मन्यते स्म (गुरोराज्ञाविचारणीया)। मानवजीवने शिक्षायाःमहत्त्वं भजते। शिक्षया एव परिष्कृता वा पुष्टीकृता बुद्धिरेव मनुष्यं सार्थकं कारयति। शिक्षायाः सम्बन्धः संस्कारः, साधनं तथा विद्यया च सह वर्तते। संस्कारः तावत् व्यक्तिगतः, तथापि किञ्चित् पूर्वार्जितकर्मणः फलमपि स्यात्। किन्तु साधनार्थं विद्यार्थ च तावत् दिशानिर्देशः अत्यवश्यकः। तादृशानिर्देशक एव गुरु इत्यभिधीयते। गुरोर्वचनं कदापि नोल्लङ्घनीयम्। यतो हि गुरुः सन्मार्गमेव प्रदर्शयति। तदर्थमेव अस्मानुद्बोधयति। आचार्य आचारं ग्राहयति, आचिनोति अर्थान्, आचिनोति बुद्धिमिति वा इति[5]। उक्तञ्च - "गुरोराज्ञा गरीयसी"। मातापितरौ, वृद्धजनादयश्च सर्वेऽपि गुरवः एव। किन्तु ज्ञानप्रकाशेन जीवनपथः अज्ञानान्धकारस्य निवारकस्तावत् गुरुरेव। अतः गुरूणामाज्ञा सर्वोपरि इति मन्यते। तथैव गुरूणामाज्ञापालनविषये विचारः नैव कर्तव्यः। अर्थात् गुरुणा आदिष्टा आज्ञा यथावत् पालनीया। तत्र न कोपि विकल्पः। यथा-"आज्ञा गुरूणां ह्यविचारणीया[6]"॥ तथैव - "आज्ञाभङ्गस्तु महतां राज्ञः कार्यो न वै क्वचित्[7]"। अनेकानि उदाहरणानि सन्ति अस्मिन् विषये। गुरुकुले निवसन् शिष्यः ब्रह्मचर्यव्रतस्य पालनम् अनिवार्यम् आसीत्। शिष्यः गुरुकुलस्य आन्तरिकं बाह्यं च कार्यं पाठ्यभागत्वेन शिक्षति स्म। ब्रह्ममुहूर्ते उत्थाय, दैनिककार्याणि, गोपालनं, गुरोः आत्मनश्च पोषणार्थं भिक्षायै निर्गमनं च मुख्यकार्येषु अन्यतमम् आसीत्। भिक्षाटनेन प्रत्यागत्य प्राप्तं प्रसादं गुरुभोजनानन्तरं गुरोराज्ञानुसारं भोजनं गृह्णीयात्। एवं प्रकारेण कठोर-अनुशासित-प्रकारेण शिक्षां प्राप्य गुरुकुले द्वादशवर्षाणाम् अवधिं व्यतीताः। तयोः गुरुशिष्ययोः सौहार्दपूर्णः सम्बन्धः शिक्षाप्राप्त्यर्थं सेतुः अभवत्।

ऋग्वेदे अग्निरिन्द्रादयः देवताः गुरू अथवा आचार्यरूपेण स्तुतिरस्ति। ऋग्वैदिकाचार्यः दिव्यालौकिकज्ञानस्य प्रतीकाः। अथर्ववेदोक्तानुसारं उपनयनसंस्कारे आचार्यः शिष्यं गर्भे धारयति।

आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्री स्तिसु उदरे विभीर्ति तं जातुं द्रष्टुमभिमयन्ति देवाः॥[8]

अनेन ज्ञायते यत् आचार्यस्य गौरवं मातुः न्यूनं कथञ्चिदपि नास्ति। प्राचीनशिक्षापद्धतौ आचार्यः, उपाध्यायः, आचार्यः, श्रोत्रियः,

[3] पञ्चतन्त्रम्, काकोलुकीयम् ६०
[4] ऋग्० १/३/१०-१२
[5] निरुक्तम् - यास्काचार्यः
[6] रघुवंशः १४/४६
[7] शुक्रनीतिः ३/११८
[8] अथर्ववेद ११/५/३

गुरुः, ऋत्विक्, चरकेत्यादीनां गुरूणां स्वरूपं ज्ञायते।[9] एते सर्वे आचार्याः वैदिकयुगस्य शिक्षाव्यवस्थां चालयन्ति स्म काल, मनु, कश्यप, वशिष्ठ, विश्वामित्र, अगस्त्य, बृहस्पति, शुक्राचार्य, भारद्वाज, अत्रि, कण्व, भृगु, च्यवन, शौनकेत्यादयः प्रमुखाः आसन्।

गुरुः आदर्शनागरिकाणां जनकवत् राष्ट्रनिर्माता च अमन्यत। वैदिककाले गुरवः द्वयोः वर्गयोः आसन् -

- गृहाध्यापकाः अस्मिन् वर्गे प्रत्येकः ब्राह्मणः आचार्यः आसीत्। वैदिकयुगे ब्राह्मणशब्दः जात्यभिप्रायः न अपितु आचार्य, गुरु, विद्वान् इति बोधकः आसीत्। प्रत्येकः ब्राह्मणः स्वगृहे एव स्वपुत्रपौत्रभ्रातृजादिभ्यः ज्ञानं प्रयच्छति स्म। एतत् समकालीनशिक्षाव्यवस्थायाः पारिवारिकरूपम् आसीत्।
- आश्रमवासी शिक्षकः अस्य वर्गस्यान्तर्गतं ऋषयः, मुनयः, विप्रगणाश्च सन्ति। एते गुरवः ग्राम्य-नागरिकवातावरणात् दूरं वनेषु आश्रमनिर्माय तपसाधनेषु व्यतीताः। ज्ञानपिपासितेभ्यः शिष्येभ्यः ज्ञानं प्रयच्छन्ति स्म। ये गुरवः दशसहस्रब्रह्मचारीन् शिक्षाभोजनवस्त्रादिव्यवस्थां च कुर्वन्ति स्म, ते 'कुलपतिः' इति नाम्ना उच्यन्ते स्म।

उपनिषदि प्रमुखगुरुषु ऐतरेयः, पिप्पलादः, श्वेताश्वरः, शाण्डिल्यः, सनत्कुमारः, वामदेवः, अश्वपतिः, सत्यकाम जाबालिः, जनकः, अजातशत्रुः, याज्ञवल्क्यः, उद्दालकः, आरूणिः, श्वेतकेतुः तथा मैत्रेयी इत्यादयः आसन्।

वैदिकयुगस्य शिक्षाव्यवस्था समूहप्रधानं न अपितु व्यक्तित्वपरकः आसीत्। अतः तत्कालीन प्रत्येकछात्रस्य पृथक्-पृथक् प्रशिक्षणम् आसीत्। वैदिकयुगे षड्प्रकाराः विद्यार्थिणः शिक्षाप्राप्त्यर्थम् अर्हाः इति मन्यन्ते स्म। १. शिष्यः, २. धारणाशक्तिसम्पन्नः, ३. धनदाता, ४. पुत्रः, ५. वेदध्यायी, 6. यः एकां विद्यां शिक्षित्वा अन्यामपि शिक्षायाः जिग्रहीषति। वैदिकयुगस्य शिक्षाव्यवस्थायां छात्राः अपि द्विधा विभक्ताः आसन्।

गृहवासिनः छात्राः - यः छात्रः पितुः, पितामहात्, मातुलात् ब्राह्मणाद् वा गृहे एव पठति स्म सः गृहवासी छात्रः इति उच्यते स्म। अन्तेवासिनः छात्रः - अन्तेवासिनः छात्राः ते आसन्, गुरोः आश्रमे शास्त्रनियमानुसारं निवसन्ति स्म। एतेषु शिष्येषु राजकुमाराः, सामान्यनागरिकाणां बालकाः, निर्धनिकः छात्राश्च समानरूपेण आसन्।

त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति। प्रथमस्तप द्वितीयो ब्रह्मचर्याचार्य कुलवासी।[10]

गुरुः अध्ययनार्थम् आगतं शिष्यं कतिपयान् मासान् परीक्षयति स्म यत् सः ज्ञानं प्राप्तुं समर्थः अस्ति वा न वा इति। आदर्शछात्रेभ्यः कतिपयगुणाः अपेक्षिताः आसन् यथा - धृतिः, क्षमा, दम् (इन्द्रियनियन्त्रण), अस्तेयः, शौचः, इन्द्रियनिग्रहः, सत्यः, अक्रोधः, यमः (सत्यः, अहिंसा, अस्तेयः, अपरिग्रहः, ब्रह्मचर्यः) अथ च पञ्च नियमाः (शौचः, सन्तोषः, तपः, स्वाध्यायः, ईश्वरभक्तिश्च) अतीव महत्त्वपूर्णम् आसीत्।[11]

शिष्यस्य शिक्षणविषये तीव्रजिज्ञासा अत्यावश्यकः गुणः। "यथा मृगः जलं अन्वेष्टुं वने परिभ्रमति, तथैव शिक्षाप्राप्तुकामः युवकाः ज्ञानं अन्विष्य आचार्यस्य आश्रमान् प्राप्नुयुः। शिष्यस्य कृते आवश्यकम् आसीत् यत् सः विनयी, "विद्या विनयेन शोभते" मृदुभाषी, ब्रह्मचारी, सेवानिष्ठः, धैर्यवान् च भवेत्। ब्राह्मचारी समिधा, मेखला, मृगचर्म इत्यादीन् धारयन् व्रतान् पालयति।[12] शिष्यस्य कर्तव्यम् आसीत् यत् सः गुरुं ज्ञानाय प्रार्थयति, 'हे वाक्प्रदाता गुरुदेव!, वेदमन्त्रान् मां शिक्षयतु' इति।

वैदिकयुगे शिष्यं त्रिमूर्द्धा इति कथ्यते स्म। 'माता-पिता-गुरुणाम्' ज्ञानानुभवप्रापकः कथ्यते। अतः शिष्याय गुरोः महत्त्वं माता-पित्रोः समं मन्यते। माता जन्मदात्री अतः जननी इति उच्यते, पिता पोषणात् जनकः, गुरुः चारित्रस्य, व्यक्तित्वस्य च निर्माता भवति। अतः सः बालकम् आध्यात्मिक-बौद्धिक-मानसिकरूपेण सशक्तः करोति। बालकस्य माता केवलं शारीरिकरूपेण एव बालकं जनयति, परन्तु गुरुः बालकं मानसिकरूपेण नूतनं जन्म प्रददाति अथवा मानवं निर्मापयति।

गुरुशिष्ययोः सम्बन्धः पितापुत्रतुल्यवत् भवेत्। आश्रमे स्थित्वा शिष्यः गुरोः रक्षणं प्राप्नोति। वस्तुतः गुरुः पितुरपेक्षया अधिकम् उत्तरदायित्वं निर्वहति, छात्राणां अन्नपानादिभिः भौतिकावश्यकताभिः सह गुरुः तेषां सर्वतो विकासस्य दायित्वमपि निर्वहति। गुरुः छात्रं कुशलं, व्यावहारिकं, समर्थं, सक्रियं, उत्तरदायी च नागरिकं निर्माय अग्रिमाश्रमे गृहस्थाश्रम योग्यं निर्मापयति। एतादृशं पितृसदृशं गुरुं प्राप्य, आज्ञापालनं च स्वपुत्रात्मकं कर्तव्यं निर्वहति। गुरुसेवा महत्तमा सेवा मन्यते स्म। वैदिकयुगे गुरुसेवां विना सरस्वत्यः आशीर्वादः न प्राप्यते इति मन्यते। गुरुः आदर्शगुरुत्वरूपेण छात्राणां सम्पूर्णरूपेण प्रत्यहं विकासार्थं सर्वथा प्रयतते। गुरुशिष्ययोः मध्ये संरक्षक-संरक्षितसम्बन्धः दृश्यते। यदि गुरुः अस्वस्थः भवति चेत् तर्हि

[9] वैदिक साहित्य एवं इतिहास।

[10] छा० उ० २.२३.१

[11] योगतत्त्वोपनिषद्

[12] मनुस्मृति

शिष्याः गुरुं प्रति स्वकर्तव्यं मत्वा सेवा निर्वहन्ति। तथा च शिष्यः रोगी भवति स्म तदा गुरुः तस्य संरक्षकधर्मं पालयति।

उपनिषद्शिक्षायाः स्वरूपमेवमासीत् यत् गुरुशिष्ययोः मध्ये सर्वथा स्वतन्त्रः सम्बन्धः आसीत्। यस्मात् कारणात् आचार्यशिष्ययोः मैत्रीपूर्णव्यवहारः प्रफुल्लितः भवति। मैत्रीभावात् एव तत्कालीनाः शिष्याः स्वगुरुं प्रति सर्वं निःसंकोचं वक्तुम् अशक्नुवन्। गुरुरपि शिष्याणां समस्यानां समाधानं स्नेहेन करोति स्म। परस्परं मैत्रीफलस्वरूपेण छात्राणां मध्ये करुणा, प्रेम, सहानुभूत्यादयः मानवीयगुणाः संप्रेषिताः विकसिताः च भवन्ति। गुरूपदेशं, प्रवचनं, वेदव्याख्यानं च धैर्यपूर्वकं श्रोतुं शिष्यस्य कर्तव्यम् आसीत्, शिष्याणां कृते आदर्शम् उदाहरणं भवितुं गुरुः स्वयमेव कठोरनियन्त्रितजीवनस्य आचरणं प्रस्तौति।

उपनिषत्कालेषु गुरुशिष्ययोः सम्बन्धः निःस्वार्थः आसीत्। गुरुः निःस्वार्थभावेन शिष्येभ्यः सेवां कर्तुं प्रयुक्तानां शिष्याणां च ज्ञानं प्रदत्तवन्तः। मनुस्मृरनुसारं मानवस्य जन्मद्वयं भवति। अत एव सः 'द्विजः' इति उच्यते। प्रथमं जन्म मातुः गर्भात् भवति, द्वितीयं जन्म 'उपनयनसंस्काराद्' आचार्यगर्भे भवति। द्वितीये जन्मे माता गायत्री (मन्त्रः) पिता आचार्यो भवति।[13] एवं प्रकारेण शिष्यः आचार्यकुले निवसति स्म, अनेककर्तव्यान्, उत्तरदायित्वं, सम्बन्धं च निर्वहति। यदा शिष्यः आचार्याय विनयी, सेवाभावं च प्रदर्शयति। गुरुपालनं तस्य प्रमुखं कर्तव्यम् आसीत्। गुरुशुश्रूषा ज्ञानं भांति योगेन विन्दति। एतेन सः इष्टं ज्ञानं प्राप्नुयात्। गुरुः बालकस्य आध्यात्मिकः बौद्धिकः जनकः इति मन्यते। अतः शिष्यस्य अज्ञानस्य अन्धकारं दूरीकर्तुं च ज्ञानस्य अन्तः प्रकाशं प्रज्वलितुं गुरोः कर्तव्यम् आसीत्। तेन सह शिष्येषु आदर्शचरित्रमपि प्रवर्तयेत्, तेषां सर्वाङ्गीणविकासोऽपि कुर्यात्। "आचार्य देवो भव[14]" इति

आचार्याः छात्रान् प्रति पितृवत् व्यवहरति, शिष्याः स्वं गुरुपरिवारस्य सदस्यरूपेण मन्यन्ते। तयोः मध्ये अतीव सौहार्दपूर्णः ज्ञानव्यवहारः आसीत्। गुरुशिष्ययोः सः पवित्रः सम्बन्धः केवलं शिक्षाकाले एव सीमितः नासीत्, किन्तु तदनन्तरमपि सम्बन्धे सा एव पवित्रता तिष्ठति।[15]

## सन्दर्भ सूची

1. इशादि नौ उपनिषद्, गीताप्रेस,गोरखपुर ।
2. छान्दोग्योपनिषद्, गीताप्रेस,गोरखपुर ।
3. उपनिषद्-अङ्क, गीताप्रेस,गोरखपुर ।
4. डॉ.विजय कुमार शास्त्री,उपनिषद् योग तत्त्व दर्शन,भरतीय विद्या प्रकाशन।
5. प्रो.राजाराम गुप्ता,मनुस्मृतिः,पुस्तकमाला।

---

[13] मनु० २/७०

[14] तैत्तिरीयोपनिषद्

[15] महा.भारत ५/३६/५३